**दिष्ट्या** अव्य० दिश–सम्पदा०भावे क्विप् दिशं देशनं स्त्यायति स्त्यै–ष्ट्यै–वा क्विप्, अन्यत्रादि०नि०वा। १हर्षे २मङ्गले भाग्यार्थकदिष्टिशब्दस्य तृतीयान्तस्य रूपमित्यन्ये तेन ३भाग्येनेत्यर्थः। "अन्योऽन्यगतसौहार्दा दिष्ट्यादिष्ट्येति चाब्रुवन्" भा० आ० १२८अ०

**दिष्णु** त्रि० दा–गिष्णु। दातरि उणादि०।

**दिह** लेपने अदा० उभ० सक० अनिट्। देग्धि दिग्धे अधिक्षत् अधिक्षत-अदिग्ध अधिक्षन्त अदिहत।। दिदेह दिदिहे। देग्धा धेक्ष्यति दिग्धः। "अदिहंश्चन्दनैः शुभैः" भट्टिः। "स चन्दनोशीरमृणालदिग्धः" भट्टिः। उपसर्गपूर्वकस्य तत्तदुपसर्गद्योत्यार्थयुक्तलेपने। प्रणिदेग्धि "दन्तास्तपसाभिदिग्धाः" अथ०५।१८।८ "दन्तरजसावदेग्धि" कौ०त०ब्रा०२१ "कवचैः शोणितादिग्धैः" भा०भी० ३२८४ श्लो० "ऊर्जं वा एतं रसं पृथिव्या उपदीका उद्दिहन्ति यद्वल्मीकम्" तै०आ०५।२।८ "लोहानां च मणीनां च मलपङ्कोपदिग्धता" काम०नी० "शिरोगलं कफोपदिग्धम्" सुश्रु० "यथाश्मो भूमौ निदिग्धं तदमुया स्यादेवं तत्" शत०ब्रा० १।७।२।१२

**दी** क्षये दि० आत्म० अक० अनिट्। दीयते अदास्त। दिग्ये ओदित् दीनः। उपसर्गपूर्वकस्य तत्तदुपसर्गद्योत्यार्थक्षये "अध श्येनो जवसा निरदीयम्" ऋ०४।२७।१ "आपो नप्त्रे घृतमन्नं वहन्तीः स्वयमत्कैः परिदीयन्ति यह्वीः" ऋ०२। ३५।१४

**दीक्ष** मौण्ड्ये यागे उपनयने नियमव्रतयोरादेशे च भ्वा० आ०सक० सेट्। दीक्षते अदीक्षिष्ट। दिदीक्षे दीक्षिष्यते। "दीक्षस्व मह रामेण त्वरितं तुरगाध्वरे" भट्टिः "यज्ञादु ह वा एष पुनर्जायते यो दीक्षते" ऐत०ब्रा०२।२२ "कथं नो मध्येऽदीक्षिष्ट" ऐत०ब्रा० २।१९ "ब्रह्मसत्रेण दीक्षिष्यमाणः" भाग० ३।१।६ क्वचित् वेदे पदव्यत्ययः "ते ह देवयजनं दिदीक्षुः" पञ्चवि०ब्रा०२४।१८ णिच्। दीक्षयति "राजानं दीक्षयामासुः सर्पसत्राय वै तदा" भा० आ० २०१७ श्लो०।

**दीक्षण** न० दीक्ष–भावे ल्युट्। यज्ञाद्यर्थनियमभेदे। "वक्ष्य मोक्षमखदीक्षणेष्वपि" राजमार्त्तण्डः।

**दीक्षणीय** न० दीक्षणाय हितादि छ। दीक्षासाधने हविर्भेदे। "यो दीक्षते आग्नावैष्णवं द्वादो दीक्षणीयं हविर्भवति" शत०ब्रा० ३।३।४।२१। १इष्टिभेदे स्त्री "दीक्षणीयाप्रायणीयातिथ्यदेवता" कात्या०श्रौ०५।३।१० "दीक्षणीयादीनां सकलानामिष्टीनां सदेवताकानामुपांशुत्वम्" कर्कः "वागन्तेन वा दीक्षणीयां, नीचैस्तरां नीचैस्तरामितरे" कात्या०श्रौ० ७।२।२१ "अथ वा वागन्तेन उच्चमया वाचा उच्चैर्दीक्षणीयां कुर्युः इतरे द्वे इष्टी प्रायणीयातिथ्ये नीचैस्तरां कर्तव्ये, दीक्षणीया उच्चैस्तरां, प्रायणीया तदपेक्षया नीचैस्तरां, तदपेक्षया नीचैस्तरामातिथ्येति" कर्कः। २सौमिके इष्टिभेदे हेम०। ४वाजपेयाङ्गभूते इष्टिभेदे। "वाजपेयाङ्गभूतानां यजतीनां दीक्षणीयाप्रायणीयादीनामादिषु सकृद्गृहीतमाज्यं जुहोति" यजु० ९।५। वेददी०।

**दीक्षा** स्त्री दीक्ष–भावे अ। १नियमे २उपनयनसंस्कारे "दीयते विमलं ज्ञानं क्षीयते कर्मवासना। तेन दीक्षेति सा प्रोक्ता मुनिभिस्तन्त्रवेदिभिः" इति तन्त्रोक्ते ३अभीष्टदेवमन्त्रग्रहणे ४तदुपदेशे। यागाङ्गदीक्षा च द्वादशसंख्या अपरिमिता वा यथाह कात्या०श्रौ०७।१।२९सू० "द्वादश दीक्षाः" "अत्राग्निष्टोमे भवन्ति" कर्कः। "अपरिमिता वा" द्वादशसंख्यातोऽतिशयेनाधिकसंख्या वा दीक्षा भवन्ति "अपरिमितं प्रमाणादभूय इति" परिशिष्टकारः अतश्चत्वारो दीक्षापक्षाः, "एका दीक्षा, तिस्रो दीक्षा, द्वादशदीक्षा अपरिमिता वा दीक्षेति" शाखान्तरादेते दीक्षापक्षाः। आपस्तम्बः "दशाहमवरार्ध्यं दीक्षितो भवति मासं संवत्सरं वा यदा कृशः स्यादित्यपरं विज्ञायते च यदा वै दीक्षितः कृशो भवत्यथ मेध्यो भवति यदास्मिन्नन्तर्न किं चन भवत्यथ मेध्यो भवति यदास्य कृष्णं चक्षुषोर्नश्यत्यथ मेध्यो भवति यदास्य त्वचास्थि संधीयतेऽथ मेध्यो भवति पीवा दीक्षेत कृशो यजेत यदस्याङ्गानां हीयते जुहोत्येव तदिति विज्ञायते" इति। कर्कः "पुण्याहे दीक्षा क्रयः प्रसव उत्थानम्" ३सू० "तान्यत्र दीक्षा सोमक्रयः प्रसवः सुत्या उत्थानं समाप्तिः पुण्याहे विष्टिव्यतीपातादिज्योतिःशास्त्रनिषेधवर्जिते सुदिने भवन्ति यत एवं स्मरन्ति "आभ्युदयिकः पदार्थः पुण्येऽहनि कर्त्तव्यः एतानि चाभ्युदयिकानीति" कर्कः। तान्त्रिकमन्त्रदीक्षाकालादि मल०त० उक्तं यथा

"अथ दीक्षाकालः सा च मलमासे न कार्य्या यथाऽगस्त्यसंहितायाम् "यदा ददाति सन्तुष्टः प्रसन्नवदनो मनुम्। अयमेव तथा चैवमिति कर्त्तव्यताक्रमः। विशुद्धदेशकालेषु शुद्धात्मा नियतो गुरुः। सङ्कल्प्यौ शोधनं कर्त्तव्यमङ्कुरारोपणं तु ने।। कुर्य्यात्तान्दीक्षणं